# 94 - चतुर्नवतितम दशकम्
# तत्त्वज्ञान उत्पत्तिः

शुद्धा निष्काम धर्मैः प्रवर गुरु गिरा तत् स्वरूपं परं ते
शुद्धं देहेंद्रियादि व्यपगतं अखिल व्याप्त मावेदयंते ।
नानात्व स्थौल्य कार्श्यादि तु गुणज वपुस् संगतोऽध्यासितं ते
वह्नेर् दारु प्रभेदेष्विव महदणुता दीप्तता शांततादि ॥ ॥94-1॥

आचार्याख्या धर स्थारणि समनुमिलच्छिष्य रूपोत्तरारणि
आवेधोद् भासितेन स्फुटतर परिबो धाग्निना दह्यमाने ।
कर्माली वासना तत् कृत तनुभुवन भ्रांति कांतार पूरे
दाह्या भावेन विद्या शिखिनि च विरते त्वन्मयी खल्ववस्था ॥ ॥94-2॥

एवं त्वत् प्राप्तितोऽन्यो नहि खलु निखिल क्लेशहाने रुपायः
नैकांतात्यंतिकास् ते कृषिवत् अगद षाड्गुण्य षट्कर्म योगाः ।
दुर्वैकल्यै रकल्या अपि निगम पथाः तत् फलान्यप्य वाप्ताः
मत्तास् त्वां विस्मरंतः प्रसजति पतने यांत्यनंतान् विषादान् ॥94-3॥

त्वल्लोका दन्य लोकः क्वनु भय रहितो यत् परार्ध द्वयांते
त्वत् भीतस् सत्यलोकेऽपि न सुख वसतिः पद्मभूः पद्मनाभ ।
एवं भावे त्व धर्मार्जित बहु तमसां का कथा नारकाणां
तन्मे त्वं छिंधि बंधं वरद कृपण बंधो कृपा पूर सिंधो ॥ ॥94-4॥

याथार्थ्यात् त्वन् मयस्यैव हि मम न विभो वस्तुतो बंध मोक्षौ
माया विद्या तनुभ्यां तव तु विरचितौ स्वप्न बोधोपमौ तौ ।
बद्धे जीव द्विमुक्तिं गतवति च भिदा तावती ताव देको
भुंक्ते देह द्रुमस्थो विषय फल रसान् नापरो निर्व्यथात्मा ॥ ॥94-5॥

जीवन् मुक्तत्व मेवं विधमिति वचसा किं फलं दूर दूरे
तन्ना माशुद्ध बुद्धेः न च लघु मनसश् शोधनं भक्तितोऽन्यत् ।
तन्मे विष्णो कृषीष्ठाः त्वयि कृत सकल प्रार्पणं भक्ति भारं
येनस्यां मंक्षु किंचिद् गुरुवचन मिलत् त्वत् प्रबोधस् त्वदात्मा ॥ ॥94-6॥

शब्द ब्रह्मण्यपीह प्रयतित मनसः त्वां न जानंति केचित्
कष्टं वंध्य श्रमास्ते चिर तर मिह गां बिभ्रते निष्प्रसूतिम् ।
यस्यां विश्वाभिरामाः सकल मलहरा दिव्य लीलावताराः
सच्चित् सांद्रं च रूपं तव न निगदितं तां न वाचं भ्रियासम् ॥॥94-7॥

यो यावान् यादृशो वा त्वमिति किमपि नैवाव गच्छामि भूमन्
एवं चानन्य भावः त्वदनु भजनमेव आद्रिये चैद्य वैरिन् ।
त्वल्लिंगानां त्वदंघ्रि प्रिय जन सदसां दर्शन स्पर्शनादिः
भूयान्मे त्वत् प्रपूजा नति नुति गुण कर्मानु कीर्त्यादरोऽपि ॥॥94-8॥

यद्यल्-लभ्येत तत् तत् तव समुप हृतं देव दासोऽस्मि तेऽहं
त्वद् गेहोन्मार्ज नाद्यं भवतु मम मुहुः कर्म निर्माय मेव ।
सूर्याग्नि ब्राह्मणात्मादिषु लसित चतुर्बाहु माराधये त्वां
त्वत् प्रेमार्द्रत्व रूपो मम सतत मभिष्यंदतां भक्ति योगः ॥ ॥94-9॥

ऐक्यं ते दान होम व्रत नियम तपस् सांख्य योगैर् दुरापं
त्वत् संगेनैव गोप्यः किल सुकृतितमा प्रापु रानंद सांद्रम् ।
भक्तेष्वन्येषु भूयस् स्वपि बहु मनुषे भक्ति मेव त्वमासां
तन्मे त्वद् भक्ति मेव द्रढय हर गदान् कृष्ण वातालयेश ॥ ॥94-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥

STOTRADHWANI